अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् .......................

**Paper Code**
**BC-203**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**
**सहायकपाठ्यक्रमः (सत्रम् : द्वितीयम्)**
**संस्कृतम्**
**तृतीयपत्रम्-संस्कृतसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 75**

**अवधेयम्** : इदं प्रश्नपत्रम् पञ्चसप्ततेः अङ्कानां विद्यते। अत्र रचनानुवादकौमुदी अभिनवपाठावलिः, रघुवशम्, नीतिशतकञ्चैते चत्वारः खण्डास्सन्ति। प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसंरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## खण्ड – ''अ''

**(रचनानुवादकौमुदी)** **20 अङ्काः**

**प्रश्नः1–(क) केषाञ्चित् पञ्चानां आर्यभाषावाक्यानां संस्कृतानुवादं कुर्वन्तु –** **(05)**

(i) ज्ञानी वाग्मी को प्रेरणा देता है।
(ii) हँसती हुई कुमारी ने सामने से आती हुई नववधू को देखा।
(iii) अन्न संसार को तृप्त करता है।
(iv) तू बाल्यकाल में विद्या सीखता है।
(v) पहाड़ के ऊपर-ऊपर सूर्य तपा।
(vi) हे दुर्जन! धर्म को क्यो नहीं स्मरण करता?
(vii) इन्दुमती का शरीर फूल से भी कोमल था।

**(ख)– केषाञ्चित् पञ्चानां प्रत्यान्तशब्दानां प्रयोगं कृत्वा पञ्च वाक्यानि रचयन्तु –** **(05)**
कारूण्यम्, श्रावणीयम्, पठिता, हृत्वा, सह्यम् गद्यम्, पेयम्, जप्यम्।

**(ग)– केचिद् द्वे धातुरूप लेखनीये –** **(05)**
हृ (लिट्) ग्रह् (विधिलिङ्) कथ् (लट्, आत्मनेपद) तन् (लोट्)

**(घ)– प्रायेण दशानां पङ्क्तीनामेकं निबन्धं ''आचार्यदेवोभव'' ''इति अहिंसा परमोधर्मः'' इति वा विषयमधिकृत्य स्वकल्पनया संस्कृतभाषायामेव लिख्यताम्** **(05)**

## खण्ड – ''ब''

**(अभिनवपाठावलिः द्वितीयः)** **15 अङ्काः**

**प्रश्नः2– (क) शब्दार्थः लेखनीयः –** **(05)**

(i) संहति (ii) व्यवहर्तव्यम् (iii) युध्यते (iv) लुब्धकः (v) पर्कटीवृक्षः
(vi) मामकीनः (vii) गलिताङ्ग (viii) नैच्छन् (ix) दन्ती (x) शाखामृगः

***अथवा***

**(ख)– अपठितगद्यस्य हिन्दीभाषानुवादः कर्त्तव्यः –**
निखिले संस्कृत-वाङमये महाभारतं ज्ञान-विज्ञान कोशःरूपेण प्रथते। तत्रापिच शान्तिपर्वमूर्धन्यभूतम। अत्र प्रायशः पञ्चदशसहस्रश्लोकाःउपलभ्यन्ते। तत्रराजधर्मः आपद्धर्मः मोक्षधर्मश्च विस्तरेण व्याख्यायते। राजधर्मवर्णनम् अत्र महद् वशिष्ट्यं लभते। एतद् राजनीतिशास्त्रस्य सारम् इति विद्वद्भिः अङ्गीक्रियते। अत्र प्रष्टा महाराजो युधिष्ठिरः उत्तरिता च महामति भीष्मपितामह-महाभागः।

***अथवा***

वैदिक-वाङ्मयस्य अनुशीलनेन ज्ञायते यद् वेदेषु सर्वत्रैव समन्वय-भावना प्रतिपादिता वर्तते। य कोऽपि विषयः स्यात्, सैद्धान्तिकः धार्मिकः राजनीतिकः, सामाजिकः आर्थिकः पारिवारिको वा सर्वत्रैव समन्वयः सामंजस्यं वा प्रतिपाद्यते। समासतः अत्रः एतदेव प्रतिपाद्यते। सैद्धान्तिका विषया विविच्यन्ते तर्हि सर्वत्र समन्वयमार्ग एव श्रेयस्करः निरूप्यते। यथा - ज्ञानमार्गः कर्ममार्गो व कतरः श्रेयान् इति विषये प्रतिपाद्यते यद् उभयोरपि समन्वयः कार्यः कर्ममार्गेण सांसारिकं जीवनं सफलं भवति ज्ञानमार्गेण च अमृतत्व मोक्षप्राप्तिर्वा भवति।

**(ग)**– सङ्घ शक्तिः कलौयुगे, कीलोत्पाटी वानरः, दीर्घसूत्रीविनश्यति, अन्धानां निरीक्षणम् इत्येतेषु विषयेषु कञ्चिदेकमधिकृत्य स्वोपज्ञकथालेखनङ्कर्त्तव्यम्। **(10)**

## खण्ड – ''स''

## (रघुवंशम्) 20 अङ्काः

**प्रश्नः3– (क)** महाकवेः परिचयः लेखनीयः **(10)**

***अथवा***

महाकाव्यस्य कानि लक्षणानि? लिख्यताम्।

**(ख)– श्लोकानां व्याख्यां कुर्वन्तु –** **(5+5=10)**

(i) अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः।
अर्थ्यामर्थपतिवाचमाददे वदतां वरतः।।

(ii) तं वेधा विदधे नूनं महाभूतमाधिना।
तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः।।

***अथवा***

**श्लोकयोः काव्यसौन्दर्यं वर्णनीयम् –**

(i) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

(ii) द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।।

## खण्ड – ''य''

## (नीतिशतकम्) 20 अङ्काः

**प्रश्नः4– (क) नीतिशकतः स्मृतौ कौचिदपि द्वौ श्लोकौलेखनीयौ।** **(05)**

**(ख) दत्तेषु श्लोकेषु द्वयोः अन्वयः करणीयः–** **(05)**

(i) शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशितांकुशेनसमदो दण्डेन गो गर्दभौ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
विहितं सर्वस्यौषधमस्ति शास्त्रविहित मूर्खस्य नास्त्यौषधम्।।

(ii) जाड्यं धियो हरति सिञ्चति वाचिसत्यं
मनोन्नतिं दिषति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम्।।

(iii)स्वायत्तमेकान्त हितं विधात्रा
विनिर्मित्तं छादनमज्ञातायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम्।।

**(ग) दत्तेषु श्लोकेषु द्वौ व्याख्येयौ –** **(10)**

(i) विपदि धैर्यमथाभ्युदयेक्षमा, सदसि वाक्यटुकतायुधिविक्रमः
यशसि चाभिरूचिव्यसनंश्रुतौ, प्रकृतिसिद्धमिदंहि महात्मानाम्।

(ii) प्रारभ्यते न खलुविघ्नभयेन नीचैः
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिघ्न्यमानाः
प्रारब्धमुत्तमजना न परितयजन्ति।।

(iii) परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम्।।

---------------x---------------